निजपूर्णसुखामितबोधतनुः परशक्तिः अनन्तगुणः परमः
अजरामरणः सकलार्तिहरः कमलापतिः ईड्यतमः अवतु नः॥१॥
यत असुप्तिगतः अपि हरिः सुखवान सुखरूपिणं आहुः अतः निगमाः
स्वमतिप्रभवं जगत अस्य यतः परबोधतनुं च ततः खपतिम॥२॥
बहुचित्रजगत बहुधाकरणात परशक्तिः अनन्तगुणः परमः
सुखरूपं अमुष्य पदं परमं स्मरतः तु भविष्यति तत सततं॥३॥
स्मरणे हि परेशितुः अस्य विभोः मलिनानि मनांसि कुतः करणं
विमलं हि पदं परमं स्वरतं तरुणार्कसवर्णं अजस्य हरेः॥४॥
विमलैः श्रुतिशाणनिशाततमैः सुमनो.असिभिः आशु निहत्य दइढं
बलिनं निजवैरिणं आत्मतमोभिदं ईशं अनन्तं उपास्व हरिम॥५॥
सः हि विश्वसइजः विभुशम्भुपुरन्दरसूर्यमुखान अपरान अमरान
सइजति ईड्यतमः अवति हन्ति निजं पदं आपयति प्रणतान
सुधिया॥६॥
परमः अपि रमेशितुः अस्य समः न हि कश्चित अभूत न भविष्यति
च
क्वचित अद्यतनः अपि न पूर्णसदागणितेड्यगुणानुभवैकतनोः॥७॥
इति देववरस्य हरेः स्तवनं कइतवान मुनिः उत्तमं आदरतः
सुखतीर्थपदाभिहितः पठतः तत इदं भवति ध्रुवं उच्चसुखम॥८॥